संस्कृतवार्ता:

दिनाङ्क : 29/01/2025 सायम् - 06:20

<u>आदौ मुख्यवार्ताः</u>

· प्रशासनेन चतुस्त्रिंशत् सहस्रकोटिरूप्यकाणां व्ययेन राष्ट्रीय खनिज- अभियानम् अनुमोदितम् ।

· चतुर्विंशत्यधिक - द्विसहस्त्रतमस्य वक्फ-संशोधन-विधेयकस्योपरि संसद: संयुक्त समित्या अद्य उपयुक्त- प्रतिवेदनं स्वीकृतम् ।

· उत्तरप्रदेशे प्रयागराजे अद्य मौनी-अमावस्याया: पवित्रावसरे द्वितीयम् अमृतस्नानं श्रद्धालूभि: समाचर्यते।

· गणतन्त्रदिवस-समारोहान्तर्गतं अद्य नवदिल्ल्याः विजयचॉक- मार्गोपरि बीटिंग-रीट्रीट समारोहः जायमानः वर्तते।

· अन्ताराष्ट्रिय - क्रिकेट-परिषदा पुष्टिकृतम् यत् ज्योफ -एलार्डिस इत्यमुना आसीसी इत्यस्य मुख्य-कार्यकारी - अधिकारी-पदात् त्यागपत्रं प्रदत्तम् ।

<u>अथ वार्ताः विस्तरेण</u>

<u>खनिज- अभियानम्</u>

प्रशासनेन चतुस्त्रिंशत् सहस्रकोटिरूप्यकाणां व्ययेन राष्ट्रीय खनिज- अभियानम् अनुमोदितम् । हरितप्रौद्योगिकीं प्रोत्साहनाय आवश्यकानां महत्त्वपूर्णानां खनिजसम्पदेभ्यः स्थितिस्थापक- मूल्यशृङ्खला निर्माणाय निर्णयोऽयं विहितः। अद्य नवदिल्ल्यां प्रसारमाध्यमेन सम्बोधयन् सूचना-प्रसारण-मन्त्री अश्विनी वैष्णवः, अर्थव्यवस्थायाः विकासाय महत्त्वपूर्णानां खनिजानां महत्त्वं उद्घाटितवान्। सः अवोचत् यत्, ऊर्जा- संचाराय, कृषि क्षेत्राय, रक्षायै, इलेक्ट्रानिक्स्-

यन्त्राणां, दूरसञ्चाराय, परिवहनाय, एरोस्पेस्-यन्त्राणां, परमाणु-यन्त्राणां तथा अन्यक्षेत्राणां कृते खनिजप्रौद्योगिकी महत्त्वपूर्णा अस्ति।

## जेपीसी-वक्फ

चतुर्विंशत्यधिक - द्विसहस्त्रतमस्य वक्फ-संशोधन-विधेयकस्योपरि संसद: संयुक्त समित्या अद्य उपयुक्त- प्रतिवेदनं स्वीकृतम् । नवदिल्ल्यां वार्ताहरैः सह संवादक्रमे एकत्रिंशत् - सदस्यीय-समितेः अध्यक्षः जगदम्बिका - पालः प्रोक्तवान् यत् समित्या विधेयक-सम्बद्ध - संशोधनानि चतुर्दशखण्डेषु स्वीकृतानि । तेनोक्तं यत् समिते: प्रतिवेदनम् श्वः लोकसभा - अध्यक्षाय ओम बिरला इत्यस्मै समर्पयिष्यते । श्रीपालेन विज्ञापितं यत् विगतेषु षड्-मासेषु विधेयकोपरि विस्तृत-विचार-विमर्शो विहितः। चतुर्विंशत्यधिक - द्विसहस्त्रतमस्य वक्फ-संशोधन-विधेयकस्य उद्देश्यं अभिलेखानां प्रविधिकरणम्, पारदर्शितायां वृद्धिः, अवैध-वक्फ संपत्तीनां प्रत्याहरणाय दृढ-प्रशासनतन्त्रेण सह महत्त्वपूर्ण -परिष्कारानयनं वर्तते । अत्रान्तरे विपक्षि-सदस्यैः प्रतिवेदनस्य स्वीकरणे प्रश्नाः समुत्थापिताः।

## महाकुम्भ:

उत्तरप्रदेशे प्रयागराजे अद्य मौनी-अमावस्याया: पवित्रावसरे द्वितीयम् अमृतस्नानं श्रद्धालुभि: समाचर्यते। मौनी -अमावस्या धार्मिकदृष्ट्या महत्वपूर्णा वर्तते। अस्मिन् शुभावसरे कृतामृतस्नानं शुभदायकं भवतीति मन्यते। विश्वस्य बृहत्तमे अनुष्ठाने महाकुम्भे प्रथमम् अमृतस्नानं अस्य मासस्य चतुर्दश-दिनाङ्के मकरसंक्रान्ते: शुभावसरे जातम्। त्रयोदशसङ्ख्यकै: अखाडासमूहै: स्वानिर्धारितसमयस्य क्रमस्य च सूचना: प्रदत्ता:। मौनी- अमावस्याया: पवित्रावगाहनम् अन्वीक्ष्य उत्तरप्रदेश-प्रशासनेन सप्तस्तरीया सुरक्षायोजना क्रियान्विता। अपि च महाकुम्भस्य मेलकक्षेत्रं वाहननिषेधक्षेत्रं नातिविशिष्ट-जनक्षेत्रत्वेन उद्घोषितम्। केन्द्र-राज्यप्रशासनयो: निष्ठया समर्पितानि आरक्षिबलानि यातायातारक्षिबलानि चिकित्सकाश्च आपात्कालिक-स्थितये नियुक्ता: सन्तीति। अत्तावसरे रेलवे-प्रशासनेन नवत्यधिक-शतं विशेष - रेलयानचालनस्य योजना विनिर्मिता । उत्तर-मध्य-रेलवे इत्यस्य मुख्य जनसम्पर्काधिकारी शशिकान्त - त्रिपाठी इत्यमुना वार्ताहरैः सह संवादक्रमे विज्ञापितं यत् स्नानानन्तरं बहवः श्रद्धालवः रेलवे स्थानकं प्रति प्रत्यागच्छन्तः सन्ति।

## बीटिंग-रीट्रीट

गणतन्त्रदिवस-समारोहान्तर्गतं अद्य नवदिल्ल्याः विजयचॉक- मार्गोपरि बीटिंग-रीट्रीट समारोहः जायमानः वर्तते। अत्रावसरे राष्टर्पतिः द्रौपदी मुर्मूः, उपराष्टर्पतिः जगदीप धनखड़ः,

प्रधानमन्त्री नरेन्द्र मोदी, रक्षामन्त्री-राजनाथ सिंहः, अन्ये च केन्द्रिय-मन्त्रिणः उपस्थिताः सन्ति । वर्षेऽस्मिन् समारोहे त्रिंशत् प्रस्तुतयः भविष्यन्ति । समारोहम् उद्दिश्य दिल्ली - आरक्षकदलेन यातायातस्य व्यापक -प्रबन्धाः विहिताः। कार्यक्रमोऽयं 'कदम-कदम बढाए जा' इतिादिभिः गीतारागैः सम्पत्स्यते ।

## विराम:

**संस्कृतवार्तायाः संस्करणमिदम् इदानीम् आकाशवाणीतः प्रसार्यते। सममेव अयं कार्यक्रमः आकाशवाण्याः अन्तर्जालपटले www.newsonair.gov.in इत्यत्र, अथ newsonair चलदूरभाषीय- तन्त्रांशे अपि उपलब्धो भविष्यति।**

## महाकुम्भ - अमृतस्नानम्

राष्ट्रपति-पदासीना द्रौपदी मुर्मूः प्रधानमन्त्री नरेन्द्र मोदी च प्रयागराज - महाकुम्भे अद्य हृदयविदारकां दुरापन्नां- दुर्घटनामालक्ष्य दुःखं प्रकटितवन्तौ । राष्ट्रपतिः द्रौपदी-मुर्मूः प्रोक्तवती यत् प्रयागराज-महाकुम्भे दुरापन्नेयं घटना अत्यन्त - दुःखप्रदा वर्तते । राष्टर्पतिना सामाजिकान्तर्जालीय- माध्यमेन मृतकानां परिजनेभ्यः स्वीया संवेदना व्यक्तीकृता । सहैव व्रणित - श्रद्धालूनां शीघ्र-स्वास्थ्य लाभाय प्रार्थनापि विहिता। श्री मोदिनापि व्रणितानां शीघ्रस्वास्थ्याय कामना कृता। सः सामाजिकान्तर्जालीय -सन्देशे प्रोक्तवान् यत् स्थानीय - प्रशासनेन पीडितेभ्यः उचित-साहाय्यं प्रदास्यते।

प्रधानमन्त्रिणा प्रोदीरितं यत्तेन मुख्यमन्त्रिणा योगी-आदित्यनाथेन सहापि वार्ता विहिता । तेन प्रोक्तं यत् सः अनवरतं राज्यसर्वकारेण सह संपर्के वर्तते । घटनानन्तरं वार्ताहरान् संबोधयन् मुख्यमन्त्री योगी-आदित्यनाथः अवोचत् यत् श्रीमोदिना स्थितेः संज्ञानार्थं बहुधा तेन सह सम्पर्कः साधितः ।

## बाइट – सी एम योगी 2 -

मुख्यमन्त्रिणा प्रोक्तं यत् केन्द्रिय गृहमन्त्री अमित शाहः, केन्द्रिय स्वास्थ्यमन्त्री एवं भाजपाध्यक्षः जेपी नड्डा, सहैव राज्यपालः आनन्दीबेन पटेल इत्येतैः तेन सह सम्पर्कं साधयित्वा स्थितेः संज्ञानं स्वीकृतम्। योगी आदित्यनाथेन कथितं यत् प्रयागराज -महाकुम्भे श्रद्धालूनां अतीव - सम्मर्दः

वर्तते । प्रायः दशकोटिश्रद्धालवः तत्र उपस्थिताः सन्ति । तेन जनाः निकटवर्तिषु नदीतीरेषु स्नातुं सम्प्रार्थिताः ।

बाइट – सी एम योगी -

अत्रान्तरे प्रयागराजे मौनी – अमावास्यायाः अमृत स्नानम् यथावस्थं जायमानमस्ति ।

दिल्ली कांग्रेस

काङ्ग्रेस इति दलेन अद्य दिल्ली-विधानसभा-निर्वाचनाय स्वीयं घोषणा-पत्रम् उद्घाटितम्। दलस्यास्य वरिष्ठनेतृभिः जयराम रमेश, पवन खेरा, इत्युभाभ्यां दिल्ली-विभाग-प्रमुखेन देवेन्दर यादवेन सह घोषणापत्रं प्रकाशितम्, यस्मिन् महिलानां कृते प्रतिमासं पंचविंशतिसहस्त्र रूप्यकाणि अनुदानराशि: , पंचविंशति: लक्षरूप्यकाणि यावत् निःशुल्क-स्वास्थ्य-आश्वस्तिः, पंचाशत् रूप्यकाणि यावत् एल्. पि. जि. सिलिण्डर्, निःशुल्क- खाद्यान्नं , त्रिशत् यूनिट्स् यावत् निःशुल्क-विद्युदुत्पादनं च अङ्गीकृतम्। यदि दलमिदं निर्वाचितं भवति तर्हि जातिगणनायाः सञ्चालनं कृत्वा पूर्वांचलीय-जनानाम् कृते विभागस्य स्थापनां कर्तुं च दलं प्रतिज्ञां करोति।

आईसीसी-त्यागपत्त्रम्

अन्ताराष्ट्रिय - क्रिकेट-परिषदा पुष्टिकृतम् यत् ज्योफ -एलार्डिस इत्यमुना

आसीसी इत्यस्य मुख्य-कार्यकारी - अधिकारी-पदात् त्यागपत्रं प्रदत्तम् ।

।। इति वार्ता:।।